कक्षा 6 · संस्कृतम् · दीपकम् (NCERT)

# दशमः पाठः बुद्धिः सर्वार्थसाधिका



गजयूथः, शशकाः, शशकराजः · चन्द्रस्य प्रतिबिम्बम् · बुद्धिबलं शरीरबलात् श्रेष्ठम् · धातुः, लट्-लकारः

## पाठ-परिचयः

संसारे उत्तमजीवनाय **बुद्धिपूर्वकः व्यवहारः** आवश्यकः; बुद्धिपूर्वकेण व्यवहारेण कठिनम् अपि कार्यं सहजं भवति। स्पर्धायां प्रतिपक्षः प्रबलः चेत्, बुद्धिबलेन तं जेतुं शक्नुमः। **शरीरबलात् बुद्धिबलस्य** महत्त्वम् अधिकम् इति एषा कथा (पञ्चतन्त्र-परम्परायाः) प्रतिपादयति।

★ **परीक्षा-सुझाव: हिंदी में सार:** एक वन में सदा जल से भरा बड़ा सरोवर था। एक दिन प्यासा हाथियों का झुण्ड दूसरे वन से आया; जल पीकर, नहाकर, खेलकर सूर्यास्त के समय लौटता। सरोवर के किनारे कोमल भूमि में खरगोशों के बहुत-से बिल थे; हाथियों के घूमने से बहुत-से खरगोश घायल होते, कुछ मर भी जाते। डरे, चिन्तित खरगोशों ने शाम को सभा की; सबने अपनी राय दी पर समाधान नहीं मिला। अन्त में शशकराज बोला: 'मैं ही उपाय सोचता हूँ।' अगली रात वह गजराज के पास गया: 'यह सरोवर चन्द्रमा का निवास है; हम खरगोश उनकी प्रजा हैं, इसीलिए वे 'शशाङ्क' कहलाते हैं; खरगोश जीवित रहें तभी चन्द्र प्रसन्न होते हैं।' गजराज: 'विश्वास कैसे करूँ? दिखाओ।' दोनों सरोवर गए; जल में चन्द्रमा का प्रतिबिम्ब देखकर गजराज चकित हुआ, डर से चन्द्रमा को नमन किया और झुण्ड के साथ दूसरी जगह चला गया, फिर कभी नहीं आया। खरगोश सुख से रहने लगे। 'बुद्धिः सर्वार्थसाधिका': बुद्धि सब काम सिद्ध करती है।

## परीक्षा-दृष्टि से महत्त्वपूर्ण ★★★

- ➤ सरोवरः नित्यजलपूर्णः; गजयूथः पिपासाकुलं वनान्तरात् आगच्छति
- ➤ शशकाः बिलेषु; गजपरिभ्रमणेन क्षतविक्षताः, मृताः
- ➤ सायं शशकानां सभा; उपायः शशकराजः
- ➤ 'शशाङ्कः' = चन्द्रः (शश + अङ्कः जिसकी गोद में खरगोश)
- ➤ जले चन्द्रस्य प्रतिबिम्बम् → गजराजः भीतः नमति, अन्यत्र गच्छति
- ➤ शिक्षा: बुद्धिः सर्वार्थसाधिका
- ➤ व्याकरण: क्रियापद का मूल = धातु; लट् के चिह्न

## धातुः (अवधेयांशः) ★★★

| क्रियापदम् | धातुः | क्रियापदम् | धातुः |
|---|---|---|---|
| पठति | पठ् | निवसन्ति | नि + वस् |
| भवन्ति | भू (भव्) | गच्छति | गम् (गच्छ्) |
| प्रकाशयन्ति | प्र + काश् (काशि) | नमति | नम् |
| तिष्ठन्ति | स्था (तिष्ठ्) | कथयति | कथ् |

| लट् चिह्नानि | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्रथमः | -अति (पठति) | -अतः (पठतः) | -अन्ति (पठन्ति) |
| मध्यमः | -असि (पठसि) | -अथः (पठथः) | -अथ (पठथ) |
| उत्तमः | -आमि (पठामि) | -आवः (पठावः) | -आमः (पठामः) |

SAMPLE notesbazar.in

वर्तमानकाल = कार्य आरम्भ से समाप्ति तक का काल → लट् लकार।

## 10.1 मूलपाठः, हिंदी अनुवादः ★★★

**अंश 1** एकस्मिन् वने एकः नित्यजलपूर्णः महान् सरोवरः अस्ति। कदाचिद् एकं पिपासाकुलं गजयूथं वनान्तरात् तत्र आगच्छति। तस्मिन् सरोवरे ते गजाः स्वेच्छया जलं पीत्वा, स्नात्वा, क्रीडित्वा च सूर्यास्तसमये निर्गच्छन्ति। तस्य च सरोवरस्य तीरे समन्तात् सुकोमलभूमौ बहूनि शशक-बिलानि सन्ति, येषु बहवः शशकाः निवसन्ति। गजानां परिभ्रमणेन तेषु बिलेषु निवसन्तः बहवः शशकाः क्षतविक्षताः भवन्ति, केचन पुनः मृताः अपि भवन्ति। अतः शशकाः भीताः चिन्तामग्नाः च भवन्ति। ते दुःखम् अनुभवन्ति। स्वरक्षार्थं च ते उपायं चिन्तयन्ति।

> **अनुवाद:** एक वन में सदा जल से भरा एक बड़ा सरोवर है। कभी प्यास से व्याकुल हाथियों का एक झुण्ड दूसरे वन से वहाँ आता है। उस सरोवर में वे हाथी इच्छानुसार जल पीकर, नहाकर और खेलकर सूर्यास्त के समय निकल जाते हैं। उस सरोवर के किनारे चारों ओर कोमल भूमि में खरगोशों के बहुत-से बिल हैं, जिनमें बहुत-से खरगोश रहते हैं। हाथियों के घूमने से उन बिलों में रहने वाले बहुत-से खरगोश घायल हो जाते हैं और कुछ मर भी जाते हैं। अतः खरगोश डरे हुए और चिन्तित हैं, दुःख अनुभव करते हैं और अपनी रक्षा के लिए उपाय सोचते हैं।

**अंश 2** एकस्मिन् दिने सायङ्काले तेषां शशकानां सभा भवति। सर्वे शशकाः स्वमतं प्रकाशयन्ति। परं ते समाधानं न प्राप्नुवन्ति। अन्ते शशकराजः वदति – "अहमेव उपायं चिन्तयामि। अधुना वयं सर्वे स्वगृहं गच्छामः।"

> **अनुवाद:** एक दिन शाम को उन खरगोशों की सभा होती है। सब खरगोश अपनी राय प्रकट करते हैं, पर समाधान नहीं पाते। अन्त में खरगोशों का राजा कहता है: "मैं ही उपाय सोचता हूँ; अब हम सब अपने घर चलें।"

**अंश 3** अन्यस्मिन् दिवसे रात्रौ सः शशकराजः यूथाधिपस्य गजराजस्य समीपं गच्छति। सः गजराजं कथयति – "हे गजराज! एषः सरोवरः चन्द्रस्य वासस्थानम् अस्ति। वयं शशकाः तस्य प्रजाः स्मः, अत एव सः शशाङ्कः इति नाम्ना प्रसिद्धः। यदा शशकाः जीवन्ति तदा एव चन्द्रः प्रसन्नः भवति।" गजराजः पृच्छति – "कथम् अहं विश्वासं करोमि? किं सत्यमेव चन्द्रः सरोवरे तिष्ठति? यदि सरोवरः चन्द्रदेवस्य वासस्थानं तर्हि तत् प्रदर्शयतु।" शशकः कथयति – "आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एव सरोवरं प्रति चलावः।"

> **अनुवाद:** अगले दिन रात में वह शशकराज झुण्ड के स्वामी गजराज के पास जाता है और कहता है: "हे गजराज! यह सरोवर चन्द्रमा का निवास-स्थान है। हम खरगोश उसकी प्रजा हैं, इसीलिए वह 'शशाङ्क' नाम से प्रसिद्ध है। जब खरगोश जीवित रहते हैं तभी चन्द्रमा प्रसन्न होता है।" गजराज पूछता है: "मैं कैसे विश्वास करूँ? क्या सचमुच चन्द्रमा सरोवर में रहता है? यदि सरोवर चन्द्रदेव का निवास है तो दिखाओ।" खरगोश कहता है: "हाँ, चन्द्रमा के दर्शन के लिए हम दोनों अभी सरोवर की ओर चलते हैं।"

**अंश 4** गजराजः शशकराजेन सह सरोवरस्य समीपं गच्छति। सः जले चन्द्रस्य प्रतिबिम्बं पश्यति, चकितः च भवति। सः भयेन चन्द्रं नमति। ततः सः गजयूथेन सह अन्यत्र गच्छति। सः गजयूथः पुनः कदापि तस्य सरोवरस्य समीपं न आगच्छति। शशकाः तत्र सुखेन तिष्ठन्ति। सत्यम् एव उक्तम् – 'बुद्धिः सर्वार्थसाधिका'।

> **अनुवाद:** गजराज शशकराज के साथ सरोवर के पास जाता है; जल में चन्द्रमा का प्रतिबिम्ब देखता है और चकित हो जाता है। वह भय से चन्द्रमा को नमन करता है, फिर झुण्ड के साथ दूसरी जगह चला जाता है। वह झुण्ड फिर कभी उस सरोवर के पास नहीं आता। खरगोश वहाँ सुख से रहते हैं। सच ही कहा है: 'बुद्धि सब प्रयोजनों को सिद्ध करने वाली है।'

**शब्दार्थ:** सरोवरः = तालाब · गजः = हाथी · शशकः = खरगोश · यूथम् = झुण्ड · पिपासाकुलम् = प्यास से व्याकुल · वनान्तरात् = दूसरे वन से · मृताः = मरे हुए · भीताः = डरे हुए · चिन्तामग्नः = चिन्तित · प्रतिबिम्बम् = परछाईं · शशाङ्कः = चन्द्रमा · नाम्ना = नाम से · यूथाधिपः = झुण्ड का स्वामी

## NCERT अभ्यासः, पूर्णतः हलः ★★★

### 1. एकपदेन उत्तरत।

> **उत्तर:** (क) सरोवरस्य तीरे बिलेषु के निवसन्ति? **शशकाः** (ख) केषां परिभ्रमणेन शशकाः क्षतविक्षताः मृताः च भवन्ति? **गजानाम्** (ग) शशकराजः कस्य समीपं गच्छति? **गजराजस्य** (घ) के स्वमतं प्रकाशयन्ति? **शशकाः** (ङ)

कः चन्द्रं नमति? **गजराजः** (च) के सुखेन तिष्ठन्ति? **शशकाः**

### 2. पूर्णवाक्येन उत्तरत।

**उत्तर:** (क) चन्द्रः कदा प्रसन्नः भवति? **यदा शशकाः जीवन्ति तदा एव चन्द्रः प्रसन्नः भवति।**
(ख) सायङ्काले केषां सभा भवति? **सायङ्काले शशकानां सभा भवति।**
(ग) शशकाः किमर्थम् उपायं चिन्तयन्ति? **शशकाः स्वरक्षार्थम् उपायं चिन्तयन्ति।**
(घ) चन्द्रः केन नाम्ना प्रसिद्धः? **चन्द्रः 'शशाङ्कः' इति नाम्ना प्रसिद्धः।**
(ङ) "आम्, चन्द्रस्य दर्शनाय आवाम् अधुना एव सरोवरं प्रति चलावः" इति कः कथयति? **इति शशकराजः कथयति।**

### 3. क्रियापदैः पूरयत।

**उत्तर:** (क) किं चन्द्रः सरोवरे **तिष्ठति**? (ख) सर्वे शशकाः उपायं **चिन्तयन्ति**। (ग) सायंकाले शशकानां सभा **भवति**। (घ) शशकाः सरोवरस्य तीरे **निवसन्ति**। (ङ) सः गजराजं **कथयति**।

### 4. पुरुषः वचनं च

**उत्तर:** तिष्ठन्ति → **प्रथमपुरुषः, बहुवचनम्** · जीवन्ति → **प्रथम, बहु.** · नमति → **प्रथम, एक.** · कथयति → **प्रथम, एक.** · गच्छति → **प्रथम, एक.**

### 5. क्रियापदैः पूरयत।

| धातुः | एक. | द्वि. | बहु. |
|---|---|---|---|
| गम् | गच्छति | गच्छतः | गच्छन्ति |
| कथ् | कथयति | **कथयतः** | **कथयन्ति** |
| स्था | **तिष्ठति** | **तिष्ठतः** | तिष्ठन्ति |
| कृ (उ.पु.) | करोमि | कुर्वः | **कुर्मः** |
| जीव् | **जीवति** | **जीवतः** | जीवन्ति |
| चल् (उ.पु.) | **चलामि** | चलावः | **चलामः** |

### 6. चित्राधारितवाक्यानि (नमूना)

**उत्तर:** (क) एषः सरोवरः अस्ति। (ख) सरोवरे जलम् अस्ति। (ग) गजाः जलं पिबन्ति। (घ) शशकः गजराजं कथयति। (ङ) जले चन्द्रस्य प्रतिबिम्बम् अस्ति।

### 7. पर्यायपदानि

**उत्तर:** (क) गजः – **हस्ती** (ख) पदम् – **चरणः** (ग) चन्द्रः – **शशाङ्कः** (घ) सरोवरः – **जलाशयः** (ङ) प्रजा – **जनता**

## अभ्यासः (उत्तर सहित)

**उत्तर: सन्धिविच्छेदः:** सर्वार्थसाधिका = सर्व + अर्थसाधिका (दीर्घ) · सूर्यास्तसमये = सूर्य + अस्तसमये · अहमेव = अहम् + एव · स्वेच्छया = स्व + इच्छया (गुण)
**प्रकृति-प्रत्ययौ:** पीत्वा = पा + क्त्वा · स्नात्वा = स्ना + क्त्वा · क्रीडित्वा = क्रीड् + क्त्वा
**शिक्षा:** कमज़ोर भी बुद्धि से बलवान् को जीत सकता है; संकट में घबराएँ नहीं, उपाय सोचें।

## बहुविकल्पीयप्रश्नाः: 20 MCQs

1. सरोवरः कीदृशः?
(A) लघुः (B) शुष्कः (C) नित्यजलपूर्णः (D) मलिनः

2. गजयूथं कीदृशम् आगच्छति?
(A) पिपासाकुलम् (B) बुभुक्षितम् (C) क्रुद्धम् (D) सुप्तम्

3. शशकाः कुत्र निवसन्ति?
(A) वृक्षेषु (B) जले (C) गुहासु (D) बिलेषु

4. शशकाः किमर्थं दुःखिताः?
(A) भोजनाभावात् (B) गजपरिभ्रमणात् (C) शीतात् (D) जलाभावात्

5. शशकानां सभा कदा?
(A) प्रातः (B) सायङ्काले (C) मध्याह्ने (D) रात्रौ

6. उपायं कः चिन्तयति?
(A) गजराजः (B) सिंहः (C) चन्द्रः (D) शशकराजः

7. शशकराजः गजराजस्य समीपं कदा गच्छति?
(A) रात्रौ (B) मध्याह्ने (C) प्रातः (D) सायम्

8. 'शशाङ्कः' कः?
(A) शशकः (B) गजः (C) चन्द्रः (D) सूर्यः

9. गजराजः जले किं पश्यति?
(A) सूर्यम् (B) मत्स्यान् (C) शशकान् (D) चन्द्रस्य प्रतिबिम्बम्

10. गजराजः भयेन किं करोति?
(A) धावति (B) चन्द्रं नमति (C) गर्जति (D) जलं पिबति

11. कथायाः शिक्षा:
(A) बलं श्रेष्ठम् (B) धनं श्रेष्ठम् (C) बुद्धिः सर्वार्थसाधिका (D) जलं जीवनम्

12. 'हस्ती' इत्यस्य पर्यायः:
(A) गजः (B) सिंहः (C) अश्वः (D) शशकः

13. 'तिष्ठन्ति' – धातुः:
(A) तिष्ठ (B) स्था (C) स्त (D) ठा

14. 'निवसन्ति' – धातुः:
(A) वस् (B) निवस (C) नि + वस् (D) सन्ति

15. 'पठामः' – पुरुषः वचनं च:
(A) प्र.पु. बहु. (B) म.पु. बहु. (C) उ.पु. द्वि. (D) उ.पु. बहु.

16. 'पठथ' – पुरुषः वचनं च:
(A) म.पु. बहु. (B) म.पु. एक. (C) प्र.पु. बहु. (D) उ.पु. बहु.

17. 'जीव्' प्र.पु. एक.:
(A) जीवति (B) जीवन्ति (C) जीवामि (D) जीवसि

18. 'पीत्वा' – प्रत्ययः:
(A) ल्यप् (B) क्त (C) तुमुन् (D) क्त्वा

19. 'प्रतिबिम्बम्' अर्थः:
(A) बिम्ब (B) परछाईं (C) प्रकाश (D) चित्र

20. 'सर्वार्थसाधिका' = ?
(A) सर्वा + अर्थ (B) सर्वार्थ + साधिका (C) सर्व + अर्थसाधिका (D) सर्व + र्थ

1 (C) · 2 (A) · 3 (D) · 4 (B) · 5 (B) · 6 (D) · 7 (A) · 8 (C) · 9 (D) · 10 (B) · 11 (C) · 12 (A) · 13 (B) · 14 (C) · 15 (D) · 16 (A) · 17 (A) · 18 (D) · 19 (B) · 20 (C)

## कथन-कारण (6)

(A) दोनों सही, कारण सही व्याख्या। (B) दोनों सही, कारण सही व्याख्या नहीं। (C) कथन सही, कारण गलत। (D) कथन गलत, कारण सही।

1. कथन: गजराज दूसरी जगह चला गया। कारण: उसने जल में चन्द्रमा का प्रतिबिम्ब देखकर भय अनुभव किया।
2. कथन: खरगोश डरे और चिन्तित थे। कारण: हाथियों के घूमने से वे घायल होते और मरते थे।
3. कथन: शशकराज ने गजराज से युद्ध किया। कारण: शशकराज ने बुद्धि से उपाय सोचा।
4. कथन: सभा में सबको समाधान मिल गया। कारण: अन्त में शशकराज ने 'अहमेव उपायं चिन्तयामि' कहा।
5. कथन: चन्द्र 'शशाङ्क' कहलाता है। कारण: (शशकराज के अनुसार) खरगोश उसकी प्रजा हैं।
6. कथन: बुद्धि सब काम सिद्ध करती है। कारण: सरोवर सदा जल से भरा था।

उत्तर: 1 (A) · 2 (A) · 3 (D) · 4 (D) · 5 (A) · 6 (B)

## अंतिम-रात सारांश

- प्यासा गजयूथ → सरोवर; खरगोश घायल/मृत → सायं सभा → शशकराज का उपाय।
- 'सरोवर चन्द्र का निवास, हम उसकी प्रजा, इसलिए वह शशाङ्क' → जल में प्रतिबिम्ब → गजराज भयभीत, नमन, सदा के लिए अन्यत्र।
- 'बुद्धिः सर्वार्थसाधिका': बुद्धिबल > शरीरबल।
- धातु = क्रिया का मूल (पठ्, स्था, गम्); लट् चिह्न: -ति/-तः/-न्ति, -सि/-थः/-थ, -आमि/-आवः/-आमः।